# Rudrani (51) Rudra (51) Names

# रुद्राणिरुद्रयोः नामानि

## Document Information

Text title : Rudrani (51) Rudra (51) Names Rudranirudrayoh Namani

File name : rudrANirudrayoHnAmAni.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 2 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 2 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

Rudrani (51) Rudra (51) Names

# रुद्राणिरुद्रयोः नामानि

रुद्रस्य एकपञ्चाशन्नामानि -
पञ्चाशदेकशक्तीनां तथा नाम शृणु प्रभो ।
सर्वेषामभिधानान्ते ईशाय नम उच्चरेत् ॥ ४७-३९॥

एकैकं मातृकावर्णं नाम्न आद्ये नियोजयेत् ।
शक्तियुक्तं सदा नाम ईशान्तं सन्त्यजेत् तथा ॥ ४७-४०॥

भेदने शक्तियुक्तस्तु न्यासं कुर्यान्महायतिः ।
कुशासने सिद्धिहेतोश्चैलाजिनकुशोत्तरम् ॥ ४७-४१॥

बद्धैकमासनं योगी न्यासजालं समाचरेत् ।
अथवा द्वीपिचर्मादि कोमलाद्यासनेऽपि वा ॥ ४७-४२॥

योगाभ्यासी न्यासजालं कृत्वा सावभयो भवेत् ।
भद्रकाली गृहे स्थित्वा ये कुर्वन्ति निरन्तरम् ॥ ४७-४३॥

महान्यासं महादेव तत्क्षणादमरो भवेत् ।
आयुरारोग्यसम्पत्तिं संप्राप्नोति महाश्रियम् ॥ ४७-४४॥

समायाति मम स्थाने न्यासयोगप्रसादतः ।
न्यासधारणयोगेन मणिपूरे हृदो भवेत् ॥ ४७-४५॥

आदौ तन्नाम वक्तव्यं पश्चात् शक्त्याभिधानकम् ।
श्रीकण्ठश्चाप्यनन्तश्च सूक्ष्मा त्रिमूर्तिरेव च ॥ ४७-४६॥

अमरेश्वरश्चार्घीशो भावभूतिस्ततः परम् ।
अतिथीशस्थाण्वीशो (स्थानुकेशो) हरो झिण्टीश(झिष्टीश) एव च ॥ ४७-४७॥

भौतिकः सद्योजातश्चाप्यनुग्रहेश्वरस्तथा ।
अक्रूरोऽपि महासेनो निर्जरादिश्च षोडश ॥ ४७-४८॥

एते देवा महारुद्र षोडशस्वरविग्रहाः ।

क्रोधीशश्चापि चण्डेशः पञ्चान्तकः शिवोत्तमः ॥ ४७-४९॥

एकरुद्रस्तथा कूर्म एकनेत्रेश्वरस्ततः ।
चतुराननोऽजेशश्च सर्वः सोमेश एव च ॥ ४७-५०॥

लाङ्गलीशो* दारुकेशोऽर्द्धनारीश्वर एव च ।
(*उमाकान्तेश आषाढिः डिण्डीशोऽत्रीश एव च ।
मीनेशश्चापि मेषेशो लोहितेशः शिखीश्वरः ॥

छगलण्डे द्विरण्डेशो महाकालेश्वरस्ततः ।)
वाणीशश्च भुजङ्गेशः पिनाकीशस्ततः परम् ॥ ४७-५१॥

खड्गीशश्चरकेशश्च श्येनो भृग्वीश एव च
नकुलीशः शिवेशश्च संवर्त्तकेश एव च ॥ ४७-५२॥

एते रुद्राः समाख्याताः सर्वकाले कुलेश्वराः ।
यस्य नाम्नश्चान्तभाते ईशशब्दो न विद्यते ॥ ४७-५३॥

केशान्तं नाम संस्कृत्य न्यासं मौलीशमाचरेत् ।
कामं मोहादिनाशार्थं यः करोति निरन्तरम् ॥ ४७-५४॥

मातृकावर्णघटितं मातृकास्थलके न्यसेत् ।
शक्तियुक्तं यदा न्यासं तत्कालेऽपीशयोजनम् ।
अथवा रुद्रशक्त्या च तथा रुद्रेण सम्पुटम् ॥ ४७-५५॥

निजमन्त्रेण वा नाथ पुटितं मातृकास्थले ।
शक्त्या च ग्रथनं कृत्वा संसारं सन्तरेत् क्षणात् ॥ ४७-५६॥

रुद्राणीनामानि -
तत्प्रकारं शृणु प्राणनाथ शङ्कर वल्लभ ।
पूर्णोदरी च गिरिजा शाल्मली तदनन्तरम् ॥ ४७-५७॥

लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा ततः परम् ।
सुदीर्घमुखिगोमुख्यौ दीर्घजिह्वा ततः परम् ॥ ४७-५८॥

कुण्डोदरी चोर्ध्वमुखी तथा विकृतमुख्यपि ।
ज्वालामुखी वह्निमुखी लोलजिह्वा ततः परम् ॥ ४७-५९॥

विद्यामुखी तथा नाथ एताश्च स्वरशक्तयः ।
काद्यार्णशक्तिविद्याश्च वक्ष्यामि पार्वतीश्वर ॥ ४७-६०॥

महाकालीसरस्वत्योर्महालक्ष्म्यास्ततः परम् ।
द्राविणी नागरी भूयः खेचरी चापि मञ्जरी ॥ ४७-६१॥

रूपिणी बिम्बिनी पश्चात् काकोदरी च पूतना ।
भद्रकाली योगिनी च शङ्खिनी गर्ज्जिनी तथा ॥ ४७-६२॥

कालरात्रिः कुब्जिका च कपर्द्दिनी ततः परम् ।
वज्रा जया ततो नाथ सुमुखेश्वर्यपि प्रभो ॥ ४७-६३॥

रेवती माधवी चैव वारुणी वायवी तथा ।
वक्षोविदारिणी चैव सहजालक्ष्म्यथ प्रभो ॥ ४७-६४॥

व्यापिनी चैव माया च रुद्राङ्कपीठदेवताः ।

इति रुद्राणिरुद्रयोः नामानि समाप्ता ।

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Rudrani (51) Rudra (51) Names*
pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*